National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 240-242
© 2025 NJHSR
www.sanskritarticle.com

**श्री चन्द्रमौलि कल्याणः**
शोधच्छात्रः,व्याकरणविभागः,
श्रीराजीवगान्धीपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
शृङ्गेरी

**Correspondence:**
**श्री चन्द्रमौलि कल्याणः**
शोधच्छात्रः,व्याकरणविभागः,
श्रीराजीवगान्धीपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
शृङ्गेरी

# सिद्धे शब्दार्थसम्बन्धे

**श्री चन्द्रमौलि कल्याणः**

**शोधसारः-**

प्रमायाः करणं भवति नाना। तत्र प्रत्याक्षानुमित्युपमितिशाब्दभेदेन प्रमाः चतस्रः। तेषां प्रमाणान्यपि चत्वारि। तत्र शब्दप्रमाणकैः अस्माभिः शब्दः नितारां विचारणीयः। तदनु शब्दः, शब्दार्थः, तयोः सम्बन्धश्च सुतारां ज्ञेयः इति धिया शब्दः अर्थः सम्बन्धश्च अत्र प्रबन्धे विचार्यते।

**कूटशब्दाः-**

शब्दः, अर्थः, सम्बन्धः, वाचकः, वाच्यः, शक्तिः, नित्यः, अनित्यः।

**मुख्यविचारः-**

पदं वाचकम्, अर्थो वाच्यः, **"सिद्धे शब्दार्थसम्बन्धे"**[1] इति भाष्यम्। अयमाशयः - अत्र शब्दार्थयोः नित्यत्वं तयोः सम्बन्धस्यापि नित्यत्वम् इत्याकूतं वैयाकरणानाम् । अर्थात् नित्याः शब्दाः, नित्याः अर्थाः, तेषां प्रत्येकं सम्बन्धोऽपि नित्यः। तथा च वाचकं पदन्नित्यं वाच्यार्थोऽपि नित्यः इति स्पष्टम्। अत्रेदं विचारणीयं यत् - किम्पदं कस्यार्थस्य वाचकम् इति। किं सर्वाणि पदानि सर्वार्थवाचकानि "सर्वे सर्वार्थवाचकाः"[2] इति भाष्यात्? उत प्रत्येकं पदपदार्थयोः पृथक् वाच्यवाचकत्वम्? इति। प्रथममते तावत् सर्वे शब्दाः सर्वेषां नित्यपदार्थानां वाचकाः । तेषां बोधकत्वसम्बन्धोऽप्येको नित्य एव। तथा च द्वितीयमते बुद्धिविशेषबलेनौपचारिकसम्बन्धान्तरकल्पनया सति तात्पर्ये सर्वे सर्वार्थवाचकाः इति सिध्यति।

किञ्च, साधारणव्यवहारे "नित्याः शब्दाः, नित्याः अर्था नित्यश्च सम्बन्धः" इति स्वीकारे वाच्यवाचकत्वसाङ्कर्यं प्रसज्येत। तत्परिहाराय प्रत्येकं शब्दार्थयोः सम्बन्धं निश्चेतुं शाब्दिकानां वैयाकरण-नैयायिक-मीमांसकानां प्रयत्नः भूरिशः दृश्यते। तत्र शब्दनित्यत्ववादिनो वाक्यार्थज्ञाननिपुणाः मीमांसकाः "औत्पत्तिकस्तु शब्दानामर्थः सम्बन्धो नित्यः"[3]इत्याहुः। तथैव "इदं पदम् इममर्थं बोधयतु, अस्मात् पदात् अयमर्थो बोद्धव्यः" इत्याकारा वा ईश्वरेच्छा शब्दार्थयोः सम्बन्धः, किन्तु शब्दस्तावत् अनित्यः इति नैयायिकाः अभिप्रयन्ति। बोधजनकत्वयोग्यतारूपशब्दार्थयोरनादिः सम्बन्धः इति प्राचीनवैयाकरणाः। "शब्दार्थयोरितरेतराध्यासरूपो वाच्यवाचकभावापरपर्यायस्तादात्म्यं सम्बन्धः" इति नव्यवैयाकरणाः वदन्ति। किन्तु उभयोरपि वैयाकरणयोः शब्दनित्यत्वं तु समानम् इत्यन्यदेतत्। उपस्थितेषु पक्षेषु शब्दार्थसम्बन्धविषये वैयाकरणमतं स्वान्तःसुखाय समालोचयितुं प्रयते।

अत्र प्राचीनाः वैयाकरणाः-

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ।।** इति ।[4]

यथेन्द्रियाणां स्वविषयेषु बोधजनकयोग्यतारूपसम्बन्धोऽनादिर्भवति, तथैवार्थैः सह शब्दानामप्यनादिर्बोधजनकयोग्यतारूपः सम्बन्धः भवति, इति फलितार्थः। अस्मिन् मते किं शब्दस्वरूपम्,

किञ्च अर्थस्वरूपं ययोरनादिसम्बन्धः उच्यते? तथा च शब्दार्थयोः बाह्यं स्वरूपमुत वा तद्विलक्षणं यत्किञ्चिद्बुद्धिविषयसमाविष्टं बौद्धिकम् इत्येवंपरो विचारः निश्चप्रचं प्रवर्तनीयः। न हि सविशेषं चिकीर्षितम्, अथापि शब्दस्वरूपं बौद्धं स्फोटात्मकं गृह्यते, किन्तत् स्फोटस्वरूपम् इत्यादि प्रकरणप्राप्तमुपरिष्टाद् निरूप्यते। मुख्यतया प्रबन्धेऽस्मिन् नव्यमतानुसारी विचारः प्रवर्तते। एवञ्च, नव्यमते शब्दार्थयोरितरेतराध्यासरूपं वाच्यवाचकभावापरपर्यायं तादात्म्य-म् अनादिसम्बन्धोऽभिप्रेतः। न च बोधजनकयोग्यतायाः सम्बन्धत्व-मस्त्विति वाच्यम्। तस्य सम्बन्धत्वाभावात्। सम्बन्धो हि सम्बन्धिभ्यां भिन्नः द्विष्ठः विशिष्टबुद्धिनियामकश्चेत्यादिना बोधजनकयोग्यतायाः सम्बन्धत्वासिद्धेः इति नव्यानामाकूतम्। चिकीर्षितेऽस्मिन् सम्बन्धस्वरूपविवेके, सम्बन्धस्य सम्बन्धिसापे-क्षत्वात् सम्बन्धिनोश्शब्दार्थयोः किं स्वरूपमिति विचारपथ-मारोहति। तत्रादौ शब्दार्थयोस्तादात्म्यं सम्बन्धः, इति तादात्म्य-वादिनां मतमनुसृत्य शब्दार्थयोः स्वरूपं विचार्यते।

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।**[5]

इदमत्र तात्पर्यं पुरोवर्तिनं घटं पश्यन्नपि तमजानन्नभिज्ञं पृच्छति- "कोऽयं पदार्थः?" स च घटः इत्युक्त्वोत्तरमाह। घकाराद्यानुपूर्वी-घटितघटशब्दो न हि पदार्थरूपः। अथापि 'घटः' इत्युच्यते। न हि कम्बुग्रीवदिमत्स्वरूपः पदार्थो घटशब्दस्वरूपस्तथापि घटशब्दात्म-कतया गृह्यते। तेन सिद्ध्यति घकाराद्यानुपूर्वीघटिताः शब्दाः स्वेन रूपेण सह स्ववाच्यार्थस्वरूपतया गृह्यन्ते इति। एवमेवोत्त-मवृद्धपुरुषेण "घटमानय" इति प्रेषाणानन्तरं प्रेष्यो मध्यमः कम्बुग्रीवादिमत्पदार्थमानयति, न त्वानयनक्रियायाः कर्मीभूतघ-काराद्यानुपूर्वीघटितं घटशब्दस्वरूपम्। एवमुभयथाऽपि घटशब्दो घटपदार्थस्वरूपाभिन्नस्वरूपोऽपि सिद्धयति। एवमेव घटपटा-दिशब्दानां तत्र तत्र तदर्थानामपि समाना स्थितिः समाश्रीयते। अतः पदार्थः स्वस्वरूपसमभिव्याहृतस्ववाचकशब्दाभिन्नो वाचकः शब्दोऽपि स्वस्वरूपसमभिव्याहृतस्ववाच्यपदार्थस्वरूपाभिन्नः। अत एव शब्दार्थयोः स्वसामानाधिकरण्येन इतरेतरात्मकत्वात्ता-दात्म्यमप्यनुभूयते। इदमेवानुभूयमानतादात्म्यं शब्दार्थयोस्सम्बन्धः इति निगद्यते। शब्दार्थयोः सम्बन्धिनोः अनादित्वाद् अभ्युपगमाद् अनादिरेव सिद्धः शब्दार्थसम्बन्धः इति निश्चितम्। तथा च वर्णानुपूर्वीघटितेन स्वरूपेण सहार्थस्वरूपोऽपि विद्यते। अर्थश्चापि स्वेन कम्बुग्रीवादिमत्पदार्थस्वरूपेण सह स्ववाचकशब्दस्वरूपोऽपि भवतीति शब्दार्थावन्योऽन्यात्मकौ। अत्र तादात्म्यं एवानयोः सम्बन्धः सिद्धः। अतः युक्तमेवोक्तम्- "अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"[6] इति। शब्दानुविद्धाः पदार्थाः, अत्र भाष्यं तावत्- "योऽर्थः स शब्दः, यः शब्दः, सोऽर्थः"[7]। किञ्च शाब्दतरङ्गिण्यामपि शब्दार्थयोरितरे-तरात्मकं स्वरूपमुक्त्वा तयोस्तादात्म्यं सम्बन्धं दृढीकर्तुं पृथगाह ग्रन्थकारः "अपि च कोकिलरूपार्थस्य पिकपदे एव शक्तिं जानतः कोकिलपदे तामजानतः पुरुषस्य कोकिलदर्शने सति "कोकिलोऽयम्" इत्यनुव्यवसायापत्तिः। ज्ञानेऽर्थमात्रस्य भानादर्थस्य च तेन ज्ञातत्वात्। अतो वाचकः पदमपि तत्र भासते इति स्वीकरणीयम्। कोकिलपदस्य वाचकस्य तेनाज्ञानान्न तस्य तथानुव्यवसायापत्तिरिति। एवमर्थे शब्दो भासते, अतोऽर्थः स्वेन स्वरूपेण सह स्ववाचकशब्दस्वरूपोऽपि भवति। एवमेव शब्दोऽपि स्वेन रूपेण सह स्ववाच्यार्थस्वरूपोऽपि भवतीत्येवं सुदृढं सुस्पष्टं दरीदृश्यते। अतः पदार्थः स्वेन रूपेण ज्ञायमानः स्ववाचकशब्दैरपि प्रतिभासितत्वादवच्छेदकावच्छेदेन वाचकशब्दस्वरूपः।

किञ्च प्रत्यक्षीक्रियमाणेषु घटपटादिपदार्थेषु प्रकारतया विशेष्यतया ज्ञानार्थं विषयताविवेकार्थं वापि पद-तदर्थयोरभिन्नस्वरूपत्वं स्वीकार्यम्। तच्च तादात्म्यसम्बन्धेनैव। एवञ्च शब्दार्थयोरन्योऽन्या-भिन्नस्वरूपत्वं तादात्म्यस्य च तत्र सम्बन्धत्वं सुतरां सिद्धयतीति अभिप्रायः।

तथैव घटादिपदानामपि घटत्वनिष्ठप्रकारता निरूपितविशेष्यत्वा-वच्छिन्ने शक्तिः इति मन्तव्यम्। अतो घटपदजन्यबोधे विशेष्यत्वादिकं भासते। व्यवसाये विषयता भासते इत्यनङ्गीकर्त्रापि निश्चप्रचं स्वीकार्यम्। व्यवसायाविषयस्यापि व्यवसायविषये विद्यमान-स्यानुव्यवसाये भानोपगमे तु "अयं गुडः" इति व्यवसायानन्तर-भाव्यनुव्यवसायो व्यवसायविषयगुडे विद्यमानं माधुर्यमवगाहेत। एवञ्च प्रत्यक्षादावपि विषयताभाननियमनि-र्वाहाय पदभानम् अपेक्षितम्। किञ्च तादशः शब्दः नित्यः स्फोतात्मकः इति वैयाकारणसम्मतम्। स्फोटश्च व्यञ्जनागम्यः। स च मध्यमवाग्रूपः इत्यन्यदेतत्। तदुक्तम् –

**परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।**
**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥**

**तादात्म्यविचारः-**

एवं प्रकारेण तादात्म्यलक्षणमपि सिध्यति - "भेदसमानाधिकरणा-भेदरूपं तादात्म्यम्" इति। एवञ्च भेदसहिष्णुरभेदः तादात्म्यमिति स्पष्टम्। तेन पदतदर्थयोस्तादात्म्येऽपि पदतदर्थयोः अभेदस्येव भेदस्यापि सत्वाच्छब्दादेव स्वादयः, न त्वर्थात्, पदतदर्थयोरभेदे सिद्धे स्वादयः प्रत्यया अर्थादपि प्रसज्येरन् इति न वाच्यम्, उक्ततादात्म्येऽभेदरूपे भेदस्यापि सुज्ञत्वात्।

नागेशभट्टास्तु "इदमेव तादात्म्यं शब्दार्थयोरितरेतराध्यासरूपम्। किञ्च "तद्भिन्नत्वे सति तदभिन्नत्वेन प्रतीयमानत्वम्" इत्याचक्षते, तदद्वैतवासनया। वस्तुतोऽध्यासमूलकतादात्म्यस्य सिद्धिर्भवति। अत एव यथार्थशक्तिग्राहकत्वात् पदतदर्थयोविभागरूपभेदस्यापि तत्र विद्यमानत्वाद् अभेदोऽपि यथार्थज्ञानग्राहकं स्वभावसिद्धं भवति। तथात्वे च तादृशतादात्म्येन पदस्यार्थवत्वात्, अत एव प्रातिपदिकत्वाद् विविक्तार्थग्रहणे प्रथमा सुलभा । अत एव तादृशतादात्म्येऽपि पदतदर्थयोरभेदेऽपि भेदस्य विविक्तत्वाद् भेदार्थकमतुबपि सुलभः, तद्धितानां भेदवाचकषष्ठ्यर्थकत्वात्। तथा च "षष्ठ्युत्पत्तिस्तु भेदकात्"[8] इति वाक्यपदीयं सङ्गच्छते।

किञ्च "कः शब्दः" इति प्रश्नेऽपि "घट इत्ययमर्थः" इत्युत्तरन्ति। तथैव "पदं श्रुतम्, अर्थं शृणु" इति व्यवहन्ति। अत्र च अर्थपदं न शब्दपरम् । पदं श्रुतमिति पृथगभिधानादपि चार्थपरमेव, अर्थस्य च श्रावणप्रत्यक्षकर्मत्वं न संभवति, अपि च शब्दस्यैव। आतश्च कथञ्चित् शब्दार्थयोस्तादात्म्यमभिसंधायैव "अर्थं शृणु" इति व्यवहारः सङ्गच्छते।

किञ्च, आदैच् इति वाच्यम्, वृद्धिः इति वाचकम्। तयोः सामानाधिकरण्येन "वृद्धिरादैच्"[9] इति सूत्रं प्रयुञ्जानः पाणिनिरपि वाच्यवाचकयोस्तादात्म्यम् सूचयति। प्रणववाच्यं ब्रह्मवाचकं प्रणवं च सामानाधिकरण्येन निर्दिशन्ति लोकाः। "ओमित्येकाक्षरं ब्रह्म"[10] इति स्मृतिरपि वाच्यवाचकयोस्तादात्म्यं द्रढयति। एवं पिनाकिनो मानभञ्जको रामो न तु तद्वाचकः शब्दः। किन्तु "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः" इति प्रयोगः शब्दार्थयोरभेदाध्यासमूलक इति तेन तादात्म्यं सिध्यति। अत एव "हिरण्यपूर्वं कशिपुं प्रचक्षते" इति प्रयोगोऽपि संगच्छते। अत्र "पुरुषविशेषं हिरण्यपूर्वं कशिपुं प्रचक्षते" इत्युक्तम्, हिरण्यपूर्वकत्वमेव कशिपुपदस्यैव। तथा चार्थस्य हिरण्यपूर्वकशिपुशब्दस्य च सामानाधिकरण्येन प्रयोगस्तयोस्तादात्म्यं द्रढयति। न च शब्दार्थयोः अभेदस्वीकारे वह्निशब्दोच्चरणे मुखे दाहापत्तिः, गुडशब्दोच्चारणे मुखे माधुर्यप्रतीत्यापत्तिः इति वाच्यम्। भेदसहिष्णोः अभेदस्यैव तादात्म्यात्। किञ्च बौद्ध एव पदार्थः इत्येव सिद्धान्त इति वा सिद्धमित्यन्यदेतत्।

**निष्कर्षः-**

आहत्य इदमाकूतम् "सिद्धे शब्दार्थसम्बन्धे" इति भाष्यदिशा शब्दः नित्यः स च स्फोटात्मकः। अर्थः बौद्धः सोऽपि नित्यः। तयोश्च सम्बन्धः वाच्यवाचकभावापरपर्यायः, सोऽपि नित्यः इति नागेशस्य हृदयम्। इति शम्।

## सन्दर्भ


1. महाभाष्यं पस्पशाह्निकम्
2. लघुमञ्जूषा, महाभाष्यञ्च
3. मीमांसासूत्रम् १.१.५
4. वाक्यपदीयम्-३.३.२९, वैयाकारणभूषणसारस्य शक्तिनिरूपणे
5. वाक्यपदीयम् – १.१२३
6. वाक्यपदीयम् – १.१२३
7. महाभाष्ये, लघुमञ्जूषायां च
8. वाक्यपदीयम्
9. पा.सू. – १.१.१
10. भगवद्गीता २.१३ श्लोकः